शरीरे शब्दार्च्चिर्ज्जलसन्तानवत् त्रिधा । संचरत्यनुरूपोऽयं नित्यमेव हि देहिनाम्” । अस्यायमभिप्रायः पुरुषास्तीक्ष्णाग्नयो मध्यमाग्नयो मन्दाग्नयश्च भवन्ति तत्र तीक्ष्णाग्नीनां रसः शब्दसन्तानवच्छीघ्रं सञ्चरति । मध्यमाग्नीनामर्च्चिःसन्तानवन्मध्यवेगेन सञ्चरति । मन्दाग्नीनां जलसन्तानवन्मन्दं सञ्चरति । तेन मासेन रसः शुक्रं भवति यदुक्तं तन्मध्यमाग्नीनधिकृत्योक्तं दीप्ताग्नीनां तु रसः किञ्चिदूनेन मासेन शुक्रं भवति । मन्दाग्नेस्तु किञ्चिदधिकेन मासेनेति सिद्धान्तः” ।

**असृग्धरा** स्त्री असृक् धरति धृ+अच् । शोणितधारिण्यां त्वचि । अस्य असृग्धाराप्यत्र ।

**असृग्वहा** स्त्री असृक् शोणितं वहति अच् । शोणितवहायां नाड्यां तद्विवरणं सुश्रुते “सप्त सिराशतानि भवन्ति । याभिरिदं शरीरमाराम इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यतेऽनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः ॥ द्रुमपत्रसेवनीनामिव च तासां प्रतानास्तासां नाभिर्मूलं ततश्च प्रसरन्त्यूर्द्धमधस्तिर्य्यक् च । भवतश्चात्र ॥ यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम् । नाभ्यां सर्व्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः ॥ नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्यपाश्रिता । सिराभिरावृता नाभिश्चक्रनाभिरिवारकैः ॥ तासां मूलसिराश्चत्वारिंशत्तासां वातवाहिन्यो दश पित्तवाहिन्यो दश कफवाहिन्यो दश दश रक्तवाहिन्यः । तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चसप्ततिशतं १७५ भवति तावत्य एव १७५ पित्तवाहिन्यः पित्तस्थाने, कफवाहिन्यश्च कफस्थाने रक्तवाहिन्यश्च यकृत्प्लीह्नोरेवमेतानि सप्त सिराशतानि ॥ तत्र वातवाहिन्यः सिरा एकस्मिन् सक्थ्नि पञ्चविंशतिः । एतेनेतरसक्थिबाहू च व्याख्यातौ ॥ विशेषतस्तु कोष्ठे चतुस्त्रिंशत्तासां गुदमेढ्राश्रिताः श्रोण्यामष्टौ । द्वे द्वे पार्श्वयोः षट् पृष्ठे तावत्य एव चोदरे दश वक्षसि ॥ एकचत्वारिंशज्जत्रुण ऊर्द्ध्वं, तासां चतुर्दश ग्रीवायाम् । कर्णयोश्चतस्रः । नव जिह्वायां । षट् नासिकायां । अष्टौ नेत्रयोः । एवमेतत् पञ्चसप्तत्यधिकशतं वातवहानां सिराणां व्याख्यातम् । एष एव विभागः शेषाणामपि ॥ विशेषतस्तु पित्तवाहिन्यो नेत्रयोर्दश कर्णयोर्द्वे । एवं रक्तवहाः कफवहाश्च । एवमेतानि सप्त सिराशतानि सविभागानि व्याख्यातानि । स्वाः सिराः सञ्चरद्रक्तं कुर्य्याच्चान्यान् गुणानपि ॥ यदा तु कुपितं रक्तं सेवते स्ववहाः सिराः । तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः ॥ नहि वातं सिराः काश्चिन्न पित्तं केवलं तथा । श्लेष्माणं वा वहन्त्येता अतः सर्व्ववहाः स्मृताः ॥ प्रदुष्टानां हि दोषाणामुच्छ्रितानां प्रधावताम् । ध्रुवमुन्मार्गगमनमतः सर्व्ववहाः स्मृताः ॥ तत्रारुणा वातवहाः पूर्य्यन्ते वायुना सिराः । पित्तादुष्णाश्च नीलाश्च शीता गौर्य्यः स्थिराः कफात् ॥ असृग्वहास्तु रोहिण्यः सिरा नात्युष्णशीतलाः”

**असृग्विमोक्षण** न० दुष्टस्य दुष्टस्य असृजः शोणितस्य देहाद् विमोक्षणं स्रावणम् ६त० । देहात् दुष्टस्य दुष्टस्य वा रक्तधातोः स्रावणे निःसारणे । तत्प्रकारादिकमुक्तं सुश्रुते “तस्मान्न शीते नात्युष्णे नास्विन्ने नातितापिते । यवागुं प्रतिपीतस्य शोणितं मोक्षयेद्भिषक् । सम्यग्गत्वा यदा रक्तं स्वयमेवावतिष्ठते । शुद्धं तदा विजानीयात्सम्यग्विस्रावितञ्च तत् ॥ लाघवं वेदनाशान्तिर्व्याधेर्व्वेगपरिक्षयः । सम्यग्विस्राविते लिङ्गं प्रसादो मनसस्तथा ॥ त्वग्दोषा ग्रन्थयः शोफा रोगाः शोणितजाश्च ये । रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥ अथ खल्वप्रवर्त्तमाने रक्ते एलाशीतशिवकुष्ठतगरपाठा भद्रदारुविडङ्गचित्रकत्रिकटुकागारधूमहरिद्रार्काङ्कुरनक्तमालफलैर्यथालाभं त्रिभिश्चतुर्भिः समस्तैर्व्वा चूर्णीकृतैः सर्षपतैललवणप्रगाढैर्व्रणमुखमवघर्षयेदेवं सम्यक् प्रवर्त्तते । अथातिप्रवृत्ते रोध्रमधुकप्रियङ्गुपत्तङ्गगैरिकसर्जरसरसाञ्जनशाल्मलीपुष्पशङ्खशुक्तिमाषयवगोधूमचूर्णैः शनैः शनैर्व्रणमुखमवचूर्ण्याङ्गुल्यग्रेणावपीडयेत् । सालसर्ज्जार्ज्जुनारिमेदमेषशृङ्गधवधन्वनत्वग्भिर्व्वा चूर्णिताभिः क्षौमेण वा ध्मापितेन समुद्रफेनलाक्षाचूर्णैर्व्वा यथोक्तैर्व्रणबन्धनद्रव्यैर्गाढं बध्नीयात् । शीताच्छादनभोजनागारैः शीतैः परिषेकप्रदेहैश्चोपाचरेत् क्षारेणाग्निना वा दहेद्यथोक्तं व्यधनादनन्तरं वा तामेवातिप्रवृत्तां सिरां विध्येत् । काकोल्यादिक्वाथं वा शर्करामधुमधुरं पाययेत् एणहरिणोरभ्रशशमहिषवराहाणां वा रुधिरं क्षीरयूषरसैः सुस्निग्धैश्चाश्नीयादुपद्रवांश्च यथास्वमुपाचरेत्” । उपद्रवास्तत्रैवोक्ता यथा ॥ “धातुक्षयात् स्रुते रक्ते मन्दः सञ्जायतेऽनलः । पवनश्च परं कोपं याति तस्मात् प्रयत्नतः ॥ तन्नातिशीतैर्लघुभिः स्निग्धैः शोणितवर्द्धनैः । ईषदम्लैरनम्लैर्वा भोजनैः समुपाचरेत् ॥ चतुर्विधं यदेतद्धि रुधिरस्य निवारणम् । सन्धानं स्कन्दनञ्चैव पाचनं दहनं तथा ॥ व्रणं कषायः